जम्भिषः, जम्भना, जिजम्भिषा, जञ्जभा ;
[A]जम्भनम् , जम्भनम् , जिजम्भिषणम् , जञ्जभनम् ;
जम्भित्वा , जम्भयित्वा, जिजम्भिषित्वा, जञ्जभित्वा ;
प्रजम्भ्य, प्रजम्भ्य, प्रजिजम्भिष्य, प्रजञ्जभ्य ;
जम्भम् २, जम्भित्वा २, } जम्भम् २, जम्भयित्वा २; } जिजम्भिषम् २, जिजम्भिषित्वा २, } जञ्जभम् २ ; जञ्जभित्वा २. }

(587) "जमु अदने" (I-भ्वादिः-471. सक. सेट्. पर. मित्संज्ञकः)

जामकः-मिका, जमकः-मिका, जिजमिषकः-षिका, जञ्जमकः-मिका ; जमिता-त्री, जमयिता-त्री, जिजमिषिता-त्री, जञ्जमिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकछमुधातुवत् (564) बोध्यानि । जान्त्वा[B] ।

## (588) "जर्ज परिभाषणहिंसातर्जनेषु"

(I-भ्वादिः-716. सक. सेट्. पर.)

जर्जकः-र्जिका, जर्जकः-र्जिका, जिजर्जिषकः-षिका, जाजर्जकः-र्जिका ; जर्जिता-त्री, जर्जयिता-त्री, जिजर्जिषिता-त्री, जाजर्जिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चर्चधातुवत् (505) ज्ञेयानि ।

## (589) "जर्ज परिभाषणतर्जनयोः"

(VI-तुदादिः-1298. सक. सेट्. पर.)

'परिभाषणसन्तर्जनयोः' इति मा. धा. वृत्तिपाठः ।

जर्जकः-र्जिकाः, जर्जकः-र्जिका, जिजर्जिषकः-षिका, जाजर्जकः-र्जिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचर्चधातुवत् (505) ज्ञेयानि । शत्रन्तात् स्त्रियां ङीपि तु 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम्विकल्पो भवति । यथा जर्जती[C]-जर्जन्ती इति ॥

---

A. 'अस्कम्भिताः प्राप्य शिशून् सजम्भनानुज्जृम्भहर्षा लिलिहुः सशल्भनम् ॥' धा. का. 1.50.

B. 'चान्तामिषश्छान्तजलः फलावलीं जान्त्वा झमज्जेमनमक्रमीद् गुहाम् ॥' धा. का. 1.60.

C. 'वृकणव्याचरसोञ्छती फलगणानव्युच्छितायां निशि स्नान्ती नर्च्छति मिच्छिता सुजनता यस्मिन् हितं जर्जती ।' धा. का. 2.73.